International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2026; 3(1): 282-287
© 2026 IJMH
www.themultijournal.com
Received: 12-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**डा. देवाशिषत्रिपाठी**
सहायकाचार्यः, साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

**Correspondence:**
**डा. देवाशिषत्रिपाठी**
सहायकाचार्यः, साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# उत्कलीयकाव्यजगति कविगंगाधरमेहेरस्य योगदानम्- एकमध्ययनम्

**डा. देवाशिषत्रिपाठी**

**शोधसारः** उत्कलप्रदेशस्य स्वनामधन्यः कविः गङ्गाधरमेहेरमहोदयः स्वभावककविः इति नाम्ना प्रख्यातः। तस्य सर्वेषु काव्येषु प्रकृतिवर्णनस्य प्राधान्यं भजते । प्रकृतिमाद्धृत्य तस्य रचनाः रुद्धिमत्यः दृश्यन्ते। संस्कृतसाहित्यस्य अनेकैः कविभिः अभिप्रेरितः अयं कविः स्वकीयं रचनाचातुर्येण स्वकीयं विशिष्टस्थानम् उत्कलकाव्यजगति स्थापितवान् । केचन कवयः मौलिकं कथावस्तुमाधारीकृत्य काव्यं रचयन्ति । अन्ये सुप्रसिद्धकविभिः रचितकाव्यानां विषयवस्तुनः अनुसरणं कुर्वन्ति, यस्य प्रमाणं भारतीयसाहित्ये भूरिशः प्राप्यते। अस्याः पद्धतेः अनुसरणं करोति कविः गङ्गाधरः। संस्कृतसाहित्यजगतः मूर्द्धन्यकवि-कालिदासस्य अभिज्ञान-शाकुन्तलमिति नाटकस्यानुसरणेन गङ्गाधरेण प्रणयवल्लरी इति काव्यं विरचितमिति उत्कलसाहित्यसमालोचकानामभिमतम्। यद्यपि उभयोः रचनयोः साम्यं विषयवस्तुदृष्ट्या वर्त्तते इति सामान्यतया परिलक्ष्यते, तथापि बहुषु क्षेत्रेषु गङ्गाधरमहोदयस्य काव्येऽस्मिन् विषयवस्तुनः परिवर्तनमपि दृश्यते। तत्र परिस्थितेः परिवर्तनं, स्थानस्य परिवर्तनं, तात्त्विकरहस्यानां परिवर्त्तनञ्च अस्मिन् काव्ये दृग्गोचरं भवति । कालिदासस्य अनुवर्तीरूपेण गङ्गाधरस्य रचना यद्यपि समानं वर्तते तथापि प्रत्येकं विषयस्य वर्णने गङ्गाधरस्य मौलिकचिन्ताधारायाः स्वाक्षरं परिलक्ष्यते । कदाचित् प्रदत्तविषयाणां वर्णनं कृत्वा स्वकीयपाण्डित्यस्य कल्पनाविलासस्य युगानुसारी चिन्तनस्य समाजधर्मी उपदेशस्य च मञ्जूलरीत्या प्रकटयति गङ्गाधरः। अतः गङ्गाधरस्य घटनासंस्थानं, चरित्रचित्रणं प्रकृतिवर्णनं च स्वकीयभावसमृद्धौ दीप्तं वर्तते । अतः 'प्रणयवल्लरी' इति काव्यं कालिदासस्य कल्पनायाः गङ्गाधरीयभावमाधुर्यस्य च सुशोभनं समन्वयमिति निश्चप्रचं वक्तुं शक्यते।

**गङ्गाधरमेहेरस्य परिचयः -** स्वभावककविगङ्गाधरमेहेरः १८६२ तमे वर्षे अगस्तमासस्य नवमदिनाङ्के श्रावणपूर्णिमायां शनिवासरे च जन्म लब्धवान् । तस्य पितामहः सदाशिवमेहेरः, पिता चैतन्यमेहेरः, माता च सेवती देवी आसन् । सः १८७५ तमे वर्षे विद्यारम्भं कृतवानीति तस्य जीवनपरिचयतः ज्ञायते। प्रथमश्रेण्यां षड्मासानि अध्ययनं कृत्वा द्वितीयश्रेण्याम् उत्तीर्यवान् । तदा सः चतुर्दशवर्षीयः आसीत्। प्रत्येकश्रेण्यां सः षण्मासं यावत् अध्ययनं कृतवान्। पञ्चमश्रेण्यां तस्य विद्याध्ययनं समाप्तं जातम्, अध्ययनकाले कविः चारुपाठः, कान्दम्बर्याः पूर्णानुवादमेवञ्च गणितस्य नूतनसूत्रं तथा च व्याकरणमित्यादीनि अधीतवान्। षष्ठश्रेण्यां शिक्षकस्याभावे सत्यपि स्वकीयप्रयासेन सः रघुवंशं, बीजगणितं प्रभृतीन् अधीतवान् । शिक्षकाभावात् तस्याध्ययने वाधा जाता। सम्पूर्णाध्ययनकाले पुस्तकक्रयार्थं तस्य प्रायः द्वे रूपके व्ययमभवत्। द्वादशवर्षे तस्य विवाहः सञ्जातः। १८७८ तमे वर्षे सः गार्हस्थ्यजीवनस्य प्रारम्भं कृतवान्। कवि-उपेन्द्रभञ्जस्य लावण्यवती, सुभद्रापरिणयः, रसिकहारावली तथा च कविदीनकृष्णस्य रसकल्लोलादिग्रन्थानां समग्राध्ययनं सः कृतवान् । सोऽपि हंसदूतम्, हितोपदेशं, हर्षचरितं, वाल्मीकिरामायणम्, अभिज्ञानशाकुन्तलञ्च सम्यक् अधीत्य रत्नावल्याः कियदंशः अधीतवान्। तस्य भाषाज्ञानं प्रगाढमासीत्। ओडिआ-संस्कृत-हिन्दी-वङ्गादिभाषासु सः प्रवीणः आसीत्। गङ्गाधरमेहेरस्य जीवनं यथा सङ्ग्रामपूर्णं, तथैव साधनाभिः समृद्धमासीत् । आमृत्युं प्रतिकूलपरिवेशस्य

उत्कटदारिद्र्यस्य च विरोधः तस्य भाग्यलेखः आसीत् । अतः स्वकीये सर्वश्रेष्ठं तपस्विनी इत्याख्ये काव्ये सः लिखति-

**"दरिद्रता पङ्कपूर्ण मो जीवन सर ।**
**जञ्जाल जलद जले आविल उदर ।।"[1]**

उत्कटदारिद्र्ये सत्यपि गङ्गाधरचरित्रस्य अपरप्रामुख्यं वैशिष्ट्यं कार्तज्ञमासीत्। अतः पूवकालिककविसूरीणां राधानाथराय-महोदयानां कृते सर्वदा ते कार्तज्ञ्यं प्रकटितवन्तः। ते स्वकीयं प्रेरकरूपेण, बन्धुरूपेण सर्वान्तिकरणेन च भक्तिप्रणमाञ्जलिं प्रकाशितवान्। गङ्गाधरः संस्कारवादी पुरुषः आसीत्। समाजे प्रचलितजाति-भेदादिव्यवस्थायाः समर्थनं सः न कृतवान् । 'कर्म हि मनुष्यजीवनस्य एकमात्रमानदण्डम्' इति तस्याभिमतमासीत्। कर्मणा मनुष्यस्य स्थानं निधार्यते इति सः अकुण्ठचित्तेन उद्घोषितवान् । अतः सः परिप्रकाशयति-

**"उच्च सेहु उच्चकर्म करे येउँ जन**
**करम निमन्ते नाहिँ वंश प्रयोजन ।**
**नीच होइ करे येवे उत्तम करम**
**ता चरण उच्चासने संसार धरम ।।"[2]**

मातृभाषां मातृभूमिं च प्रति गङ्गाधरमेहेरस्य ममत्वबोधः सम्मानबोधश्च सीमातीतमासीत् ।

**काव्ये आदर्शवादः–** प्राचीनतायाः पृष्ठभूमौ नवीन काव्यसर्जनं मेहेरमानसस्य वैशिष्ट्यमिति प्रतीयते। पौराणिककथानकस्य नवीनकाव्यरूपप्रदानेन प्राच्य आदर्शबोधस्य भित्तिस्थापनं तस्य सर्वश्रेष्ठप्रयासमिति विवेच्यते। अग्रजकल्पः कविराधानाथः विदेशीयविषयवस्तुनः प्रतिरोपणं स्थानीयसंस्कृतौ कृत्वा यत्र संस्कृति-विहीनादर्शं स्वीकरोति, तत्र कविगङ्गाधरस्य रचनायामार्यावर्त्तस्य उत्कलीयसंस्कृतेः पुनःस्थापनं चरमोज्ज्वलमिति दरीदृश्यते। स्वभावकविगुणत्वेन स्वकीयं काव्यकृतिषु पौराणिकैतिहासिक-कथासंस्करणमाध्यमेन सार्वजनीकं सार्वकालीकं च मूल्यबोधानां सावलीलपरिप्रकाशः तस्य प्रतिष्ठां द्योतयति। अहल्यास्तवमित्यस्मात् काव्यात् आरभ्य इन्दुमती, कीचकवधः, तपस्विनी, प्रणयवल्लरी, पद्मिनी आदिषु प्रत्येकं काव्येषु भारतीयनीतिबोधस्य, सशक्तचरित्रवत्तायाः, तपोनिष्ठजीवनस्य माधुर्यतायाः अन्तरङ्गोन्मोचनं विशेषतया प्राप्यते । तपस्विनीकाव्ये सीतारामयोः पवित्रप्रेम्णः चित्रम् अवर्णनीयम् । राज्ञत्वेन प्रजासमाजस्य इच्छायाः सम्मानपूर्वकं धर्मपत्न्याः सीतायाः निर्वासनप्रदानेन अपि तां प्रति रामचन्द्रस्य अनुरागे लेशमात्रं न्यूनता न प्रतीयते तस्य काव्येऽस्मिन् । समान्तररूपेण सीता अपि प्राणप्रियपत्युः अनाविलप्रेमप्रसङ्गे सचेतना इति काव्येऽस्मिन् परिलक्ष्यते। अतः निर्वासनजन्यदुःखकातरा सीता कुत्रापि रामचन्द्रस्योपरि दोषं न आरोपयति, वरं च स्वकीयदुर्भाग्यस्य अवतारणं तत्र करोति सीता । अस्मिन् प्रसङ्गे कविमुखेन सीतायाः कथनं वर्तते -

**"जीवने न पारिले मोते मरणे**
**सेविका करिदेव प्रभु चरणे हे ।**
**मो तनु दग्ध हेले हेव त खार ।**
**ताहाकु कराइव पादपे सार ।।**
**से तरु काष्ठ देइ वर्तकी हस्ते ।**
**कराइदेव प्रभु पादुका मते हे ।।"[3]**

एतत् निःस्वार्थप्रेम्णः पूर्णाङ्गचित्रणं यत् केवलम् आदर्शवादिनः गङ्गाधरस्य लेखनचातुर्यमिति निश्चप्रचं वक्तुं शक्यते। तथैव प्रणयवल्लर्यां दुष्यन्तशकुन्तलयोः पद्मिनीकाव्ये पद्मिनीभीमसिंहयो प्रीतिपरागस्य सौरभं गङ्गाधरमहोदयस्य सर्वश्रेष्ठा-दर्शवादितायाः दृष्टान्तरूपेण चिरोज्ज्वलं प्रतीयते। निःसर्त्तप्रेम्णः सुरक्षायै विश्वविधाता सर्वदा आशीर्वादं प्रयच्छति इति विश्वासः गङ्गाधरस्य प्राच्यादर्शसम्भूतायाः परिचयम् उपस्थापयति । अतः प्रणयवल्लर्यां कविः लिखति-

**"पवित्र प्रेम हि रहिअछि सेहि पुष्पगर्भे होइ मधु ।**
**हिमबिन्दु रूपे आशीर्वाद तहिँ ढालिछन्ति विश्वबन्धु ।।"[4]**

तत्र भवतु पतिव्रता सीता, प्रजानुरञ्जकः रामः, प्रेमिकः दुष्यन्तः, प्रणयिनी शकुन्तला, साध्वी इन्दुमती, सती पद्मिनी, दृढ़ चरित्रा द्रौपदी इत्यादिनां करुणायाः मूर्तिमन्तं विग्रहाणाम्, आदर्शनिष्ठचरित्राणां सर्वासां वर्णनं प्राप्यते ।

**काव्ये शिल्पविधिः–** यदि च कविगङ्गाधरः रीति-काव्यादर्शेन अनुप्राणीतः आसीत्, इति तस्य काव्येभ्यः प्रकट्यते तथापि रीतियुगीय अन्तिमभग्नांशमिति तं वक्तुं न शक्यते। रीतिकालीनवर्णनशैल्यां कवेः आद्यरचना रसरत्नाकरः रचितः । यत्र 'र' वर्णस्य संयोगः पादस्य आद्यान्ते परिलक्ष्यते, तथापि परवर्तिनीकाले कवेः रचनायां भिन्नता दृष्टिगोचरी भवति । तत्र भाषाशिल्पस्य, छन्दसौन्दर्यस्य, अलङ्कारविमण्डितस्य सम्भारेण प्राचीनार्वाचीनयोः मिश्रशैली तत्र नूनम् अनुसृतम् इति दृश्यते -

**"वाल्मीकि आश्रमकु धाउँअछि मन ।**
**करिवाकु निर्वासिता सीताङ्कु दर्शन ।।"[5]**

विषयेऽस्मिन् निर्देशनेन तपस्विनीमहाकाव्यस्य रचनायां रीति आदर्शस्य प्रभावः यद्यपि अवलम्ब्यते, तथापि इन्दुमती कीचकवधः इत्यादिषु परवर्तीकाव्येषु आधुनिककालीनशैली दृग्गोचरी भवति। कवेः गङ्गाधरस्य भाषाप्रयोगः संयतः मार्जितश्च। अनावश्यकानुचितानाञ्च शब्दानां परिहारं कृत्वा कदाचित् तत्सम अन्यथा ग्रामीण अथवा उभयोः सम्मिश्रणरूपेण काव्यनिर्माणं तस्य

वैशिष्ट्यं संसूचयति। गौडीयरीत्यनुमोदितः दीर्घसमासयुक्तं पदसंयोगं कवेः गङ्गाधरस्य भाषासौष्ठवं वैशिष्ट्यं च दृष्टान्तरूपेण परिदृश्यते । तद्यथा-

**"किए गो तु ज्योतिर्मयी शुद्ध शुभ्र वेशा ।**
**इन्द्रनील द्युति जित मनोहर केशा ।।"[6]**

संग्रहेण प्रतिपोषणेन च कवेः आदर्शवादितायाः साफल्यम् उन्मोचितं भवति। शान्ति-श्रद्धा-दया-क्षमा-तितिक्षादीनां स्वर्गीयगुणानां महत्त्वं सर्वदा अनुभूयते । प्रचारशीलानि एतानि चरित्राणि आयुगं भारतीयसमाजम् उद्बोधयिष्यन्ति इति नास्ति लेशोऽपि संशयः। प्रणयवल्लरीकाव्यस्य सप्तमसर्गे आसुरिकावगुणस्योपरि शाश्वतदिव्यगुणानां विजयवर्णनायां कविः शतमुख इति अवलोक्यते। श्रद्धासदृशोच्चगुणविषये तापसीकन्यानुकम्पायाः वचनं तपस्विनीकाव्ये इत्थं वर्त्तते-

**"अनुकम्पा तर्हिं बाइले सीते,**
**कार्यकरे लोक श्रद्धा सहिते ।**
**फुले फुले यथा विभिन्न वास**
**जीवने जीवने श्रद्धा निवास ।।**
**शरधा स्वभाव शिशु,**
**दइवी मानवी आसुरी भेदरे होइथाए फलप्रसू ।।"[7]**

कवेरनुसारं न्यायः, नीतिः, प्रीतिः, मैत्री इत्यादीनां महद्गुणानां यत्र पराहतं दृश्यते, तत्रस्था परिणतिः दारुणमेव वर्तते । कीचकवधकाव्ये क्षमतालिप्सा, आल्लाउद्दीन राज्ञः वैफल्यं, प्रणयवल्लरीकाव्ये आसुरि अपशक्तिनां तिरोधानम् इत्यादीनां प्रसङ्ग-प्रकटनेन कवेः आदर्शबोधः लुक्कायितः वर्तते इति अनुमीयते । अतः सामाजिकजीवने एवञ्च व्यक्तिगतजीवने मनुष्यस्य आदर्शबोधाधारेण स्वर्गीयसुषमा उद्भाषिता भवतीति कवेः गङ्गाधरस्य आशयः ।

**"भावुथाए मन एक फल हुए आन,**
**वुझि नुहैँ सखी, भवे विधिर विधान ।।"[8]**

सरलपदानां द्योतनं तस्य काव्येषु प्राणान् सञ्चारयति इति परिलक्ष्यते । छन्दः प्रयोगे कविः प्राचीनरीतिं स्वीकरोति । यथा- रामकेरी, वङ्गलाश्री, चोखी, रसकुल्या, तथा च चतुर्दशाक्षरयुक्तः कलहंसः केदारादिनि छान्दवृत्तानि तस्य काव्येषु दरीदृश्यन्ते । अनेन गङ्गाधरकाव्यसाहित्ये साङ्गीतिकमूल्यस्य परिकल्पना प्रायशः आधुनिकयुगेऽपि प्राप्यते । काव्यसौष्ठववर्द्धकैः सर्वपरिचितालङ्कारैः गङ्गाधरस्य काव्याङ्गना अलंकृता इति प्रतीयते। मध्यकालीन-कवितुल्य-कृत्रिमालङ्कारं संरचनां परित्यज्य कवेः राधानाथस्य पदाङ्कानुसरणेन बोधगम्य स्वच्छन्दभाववाहकालङ्काराणां प्रयोगेण गङ्गाधरस्य सिद्धता दरीदृश्यते। बहुषु क्षेत्रेषु प्रसिद्धदृश्यजन्य, स्वानुभूतिजन्य च अलङ्कारस्य उपादानं स्वीकृत्य चरित्राणां सजीवरूपचित्रणे कविः धूरीण इति अवलोक्यते । अतः उपमा- रूपक -उत्प्रेक्षा- अपह्नुति- श्लेष- वक्रोक्ति इत्यादिभिः अर्थालङ्कारैः अनुप्रास-यमकादिभिः शब्दालङ्कारैः च संयतप्रयोगेण तस्य काव्यानि रुद्धिमन्तानि । उदाहरणत्वेन अत्र प्रकटयितुं शक्यते-

रूपकम्- **"नाहिँ सिना घरे हृदा प्रेम सरे**
**मो प्रिया कमल कलि ।**
**पडिछन्ति फुटि मकरन्द लुटि**
**करुअछि मन अलि ।।"**

**उपमा-"जीवन यउवन बढिला सम**
**वसन्त बढि वने हेला ग्रीषम ।**
**युवा शकति यथा हुए प्रखरा**
**प्रचण्डतर होइ आसिला खरा ।।"**

**उत्प्रेक्षा- "जणे जणे होइ समागत हेले**
**क्रमे सर्वे नरपति ।**
**सन्ध्यादेवी कोले उइँ आसिले कि**
**उज्वल तारका पङ्क्ति ।।"[9]**

काव्ये संस्कारता – यथा कवेः जीवनम् अनुरूपं तस्य काव्यमपि संस्कारगुणेन आप्लुतम् इति सर्वे स्वीकुर्वन्ति। यतोहि तदानीन्तनसमाजे कुसंस्कारस्य अन्धविश्वासस्य च आधाराः प्रवाहिताः आसन्। ताभ्यः मार्जितोत्कलस्य आविष्करणं कर्तुं गङ्गाधरस्य अदम्यप्रयासः नाल्प इति ज्ञायते। कुसंस्कारस्य अपनोदनाय पश्चिमधारायाः प्रवाहं काव्येषु कर्तुं कविगङ्गाधरः मनोयोगी आसीत् । अतः अस्मिन् सन्दर्भे तेन मलयस्यावाहनं क्रियते यथा तस्य सुरभिणा अपसंस्कृतेः विताडनं भवेदिति आशास्यते। अतः कविः लिखति-

**"सत्वर फिटाइ पद्म परिमल मल्लिका मधुरवास,**
**दिअ दिअ ज्योति प्रकाशिनीवटि म्लान हेव वेगे नाश ।**
**प्राण आमोदन रस प्रदानरे विलम्ब न करि आउ,**
**देह प्रेमाञ्जन प्रेम आलिङ्गन करहे प्रसारि बाहु ।।"[10]**

अत्र मलयसंस्पर्शेण कवेराशा सुदूरप्रसारिणी वर्तते। तस्य भाषाप्रभावेण समाजसंस्कारं, नवीनता, विप्लवमित्यादयः स्वागतयोग्याः स्वाभाविकाश्च। अत्र प्रतिनिधित्वेन मलयस्य अवतारणं करोति कविः। अयमेव मलयः मङ्गलस्य प्रतीकरूपम्। प्रायशः प्रत्येकसमाजे देशे च नररक्तपिपासवः सत्यधर्मस्य मिथ्यास्फालनं कुर्वन्तः दृश्यन्ते । तेषां वास्तविकं प्रवञ्चकस्वरूपस्य उन्मोचनार्थं कविः लिखति- "ताकु मध्य बोलिथान्ति धर्म अवतार"। यथा ते विधर्मिणः सुरागणिकाः स्वर्णादिनामुपभोगार्थं समाजे

अत्याचारमसदाचरणं कुर्वन् सामान्यजनतानां निःशेषशोषणं कुर्वन्ति । तस्य वास्तवचित्रं प्रकटनं फकीरमोहनकृत काव्येषु प्रकट्यते। चुम्बकीयन्यायेन राधानाथेन अपि तादृशमवतारणं स्वकीयकाव्येषु कुर्वन् दृश्यते। परन्तु गम्भीररूपेण सचेतनरूपेण च तदविधमत्याचारस्य प्रकटनं स्वकीयकाव्येषु कृत्वा संस्कारकामी स्वरूपरूपेण प्रकटितः भवति गङ्गाधरः। पुनश्च स्वल्पशब्देन बहुघटनायाः उपक्रमः गङ्गाधरस्य वैशिष्ट्यं वर्तते । अस्मिन् सन्दर्भे सिडनि स्मिथमहोदयस्य उक्तिः स्मर्यते । तेन उक्तम्- "The writer does not the best who gives his reader the most knowledge and takes from him the least time."

कवेः 'पञ्चायत' इति कविता संस्कारधर्मी कवितासु स्वतन्त्रस्थानम् अलङ्करोति। तदस्मिन् पञ्चायतशासनं येन वैदिककालीनभारतं सागरमिव रत्नगर्भं हिमालयम् इव अभ्यून्नतञ्च आसीत्। पञ्चायतशासनस्य प्रवर्तनेन मौर्याणामधिपतिः चन्द्रगुप्तः सुशृङ्ख-लितशासनस्य महति परम्परा प्रतिस्थापयितुं समर्थः आसीत् । तस्य पञ्चायतशासनस्य विलोपेन भारतवर्षं पराधीनम् अभूदिति कवेः गङ्गाधरस्य विचारः आसीत्। अतः विंशशताब्द्यां महामानवेन गान्धिना पञ्चायतराज्य रामराज्यत्वेन उद्घोषितम् । यतो हि ईदृशस्य शासनस्य प्रतिष्ठायां समाजे स्वस्थ-शृङ्खलित-शान्तिपूर्ण-परिस्थितेः स्थापयितुं शक्यते इति गङ्गाधरस्य विश्वासः आसीत् । अतः 'पञ्चायतम्' इत्यस्मात्पुस्तकाद् गङ्गाधरमहोदयस्य संस्कारप्रिय-स्वभावस्य परिचयः प्राप्यते। तस्य मतेन समाजसंस्कारदायित्वं केवलं कविनां लेखकानां वा प्रमुखरूपेण वर्तते । अस्य पुष्टिं कर्तुं लेनिन्महोदयस्य चरमोक्तिं सः अवतारयति। यथा- "It is impossible to live in the society and be independent of society."

**काव्ये नैतिकता–** सर्वेषु भारतीयसाहित्येषु नीतिरेव रचनायाः कलायाः वा सौन्दर्यमिति परिगण्यते। अतः महापुराणादारभ्यः लघुगीतिकवितापर्यन्तं नीतिसम्पन्नजीवनस्य स्वस्थसमाजस्य निर्माणाय इङ्गितं परिलक्ष्यते। प्रत्येकं काव्यरचनायां संसारस्य जीवनस्य च सत्यं नीतिरूपेण परिवेषितं भवति। अस्माकं सारलामहाभारतं नीति-उपदेशानां भण्डारमिति कथ्यते। पञ्चसखासाहित्ये सर्वत्र शुद्धपूतं नीतिपूर्णं च जीवनार्थमुपदेशाः प्राप्यन्ते । आधुनिककाव्यकवितासु राधानाथमहोदयः अपवादः आसीत्, यः नीतिं परिहार्य साहित्यिकसौन्दर्यस्य प्रकटनार्थं काऽपि धारा साहित्ये निर्धारितम्, तस्य प्रमुखोदाहरणं भवति 'पार्वती' महाकाव्यम् । परन्तु गङ्गाधरमहोदयस्य सर्वेषु काव्येषु नीतिसौन्दर्यं सुरक्षितमिति अवलोक्यते। परन्तु साहित्यिककलासौन्दर्यं तत्र दुर्लभमिति अनुमीयते। अन्येषु बहुषु काव्येषु गङ्गाधरः नीतीनां यथार्थभावं प्राञ्जलतया प्रकाशयति । यथा संस्कृतभाषायाम् एका नीतिवाणी वर्तते-

**"नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।"**

**गङ्गाधरः उत्कलभाषया तस्यैव भावस्यानुवादं करोति यत्-**

**"अलस लोकर पाखकु न पशइ सम्पद ।**

**मधु आसि मुखे न पशे शोइथिले षट्पद ।।"** [11]

काव्ये रसविचारः– गङ्गाधररचनायां प्रतिछत्रं करुणरसस्य उपस्थितिः परिलक्ष्यते। करुणरसस्य कल्लोलं निर्माय स्वकीयरसपिपासायाः चरितार्थाय प्रचेष्टः आसीत् गङ्गाधरः। निर्वासनकाले निद्रिता सीता यदा निर्जनवने जाग्रता अभूत्, तदा आत्मनम् असहाया, परित्यक्त्वा, निःसङ्गा च अमन्यत् । तस्मिन् समये तस्य अन्तरं विषादप्राबल्येन प्रकम्पितमासीत्। तस्याः वाष्पाकुलित-शोकोच्छवासेन वनभूमिः प्रकम्पिता अभूत् । सीतायाः अवस्थायां वनप्रकृत्या प्रकटिता समवेदना यथा आसीत् तस्य चित्रणं कालिदासेन इत्थमुल्लिखितम्-

**"नृत्यं मयूराः कुसुमानि वृक्षाः दर्भानुपात्तान् विजहुर्हरिण्यः तस्याः प्रपन्ने समदुःख भावमत्यन्तमासीदरुदितं वनेऽपि ।।"**[12]

कालिदासस्य उद्धृतश्लोकानुसरणेन निहितभावग्रहणेन च रसपरिसरे वृद्धिम् आनेतुं तपस्विनीमहाकाव्ये रसपिपासुः गङ्गाधरः लिखति-

**"मृगशिशु जननीर स्तनमुखे धरि**
**निश्चले रहिला क्षीर शोषण न करि,**
**मुखदर्भ मुखे धरि मृगमृगीमाने**
**ग्रीवा भाङ्गि रहिगले शोकध्वनि ध्याने,**
**मयूर-मयूरीगण शावक सहित**
**चित्रित पराये हेले चापल्य रहित ।।"** [13]

रघुवंशमहाकाव्ये आत्मनः धीक्कारं कृत्वा सीता विलापध्वनिव्याजेन यथा रघुकुलस्य प्रशंसा अकरोत् तस्य प्रकटनं कालिदासेन निम्नरीत्या क्रियते-

**"राजर्षि वंशस्य रविप्रसूते उपस्थितः पश्यति कीदृशाऽयम् ।**
**मत्तः सदाचारः, सूचे कलङ्कः पयोदवातादिव दर्पणस्य ।।"**[14]

गङ्गाधरः अपि उपर्युक्तश्लोकस्य निहितभावं स्वीकृत्य स्वकीयकाव्यविलासत्वेन लिखति-

**"वंशर जनक तुम्भर एहि दिवाकर,**
**भुवन मङ्गल दाने सदा मुक्त कर ।**
**धराधात्री स्वरपिणी एहि भागीरथी,**
**तुम्भरि वंशर चिरविख्यात कीरति ।।**
**कीर्त्ति अनुरोधे सिना कल मोते त्याग ।**
**ए तुम्भर उपयुक्त कर्म महाभाग ।।**
**एहि कीर्त्ति पताकारे पापिनीर चित्र।**

**रहियिव, एहा किन्तु विषम बिचित्र ।।**

**धिक मो जीवन ताथ ! एका मोह लागि ।**

**अकलङ्क थाइ हेल अपयश भागी ।।"**

रघुवंशम् अतिरिच्य रस तथा वैचित्र्यविचारदृष्ट्या भवभूति-विरचितस्य उत्तररामचरितनाटकस्य प्रकृतिवर्णनमपि मेहेरमहोदयेन अनुसृतम् । अष्टवक्रमुखात् वशिष्ठऋषेः आदेशं श्रुत्वा रामचन्द्रेण यत् भणीतं तस्य अवतारणं भवभूतिः करोति-

**"स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि ।**

**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ।।"**

अस्यानुसरणेन गङ्गाधरोऽपि सीतामुखेन रामचन्द्रस्य सुगुणं वर्णयित्वा लिखति-

**"प्रकृति रञ्जने येवे हुए प्रयोजन ।**

**करिपारे प्राणसमा सीता विसर्जन ।।"**

पुनश्च प्रकृतरामायणस्य कतिपयपङ्क्तीनां प्रतिफलनं मेहेरप्रणीततपस्विनीकाव्ये परिदृश्यते। केवलं भावं संगृह्य रसपिपासुनां गङ्गाधरेण रससमृद्धानां पङ्क्तीनामवतरणं कृतम्। यथा –

**"व्यतीता वार्षिकी रात्री श्रावणी लघु विक्रमा ।"**

तथैव तपस्विनीमहाकाव्ये-

**"श्रावणी वर्षिकी भीमा विभावरी ।**

**शेष होइगला मुहूर्त्तक परि ।।"**

पुनश्च रामायणे-

**"जगाम तत्र द्रष्टार ददर्श च कुमारकौ ।**

**भूताघ्नी चाकरोत्ताभ्यां रक्षां रक्षो विनाशिनी ।।"**

तपस्विनीमहाकाव्ये-

**"काले अनुकम्पा मुनि आज्ञामते ।**

**भूत विनाशिनी रक्षा सेहिमते ।।"**

**काव्ये चरित्रचित्रणस्य नैपुण्यम्–** गङ्गाधरस्य काव्येषु चरित्राणाम् उपस्थापनं केवलं मानवसमाजस्य कल्याणार्थं सन्देशवाहकरूपेण निर्द्धारितम्। गङ्गाधरस्य विचारेण संसारे ते एव आदर्शरूपस्य यथार्थप्रतीकत्वेन गृह्यन्ते, ये स्थितप्रज्ञाः, धीराः, प्रशान्तचेतसाश्च। आध्यात्मिकजगति तेषां स्थानमुच्चतमम् । ते 'वसुधैव कुटुम्बकम्' इति भावं परिपोषयन्ति । 'अयं निज परो वेति गणना' एतेषां कदापि न वर्तते । प्रशान्तप्रकृतयः कमनीये क्रोडे एते साधनारताः । साधनायाः सिद्धिः केवलं जनकल्याणाय अभिप्रेता। अतः ईदृशानां चरित्राणामुदाहरणानि वाल्मीकिकण्वानुकम्पागौतमी इत्यादयः। एतासां च मनस्सु निष्कामरूपेण मानवसमाजस्य शुभाकाङ्क्षा एव अवलोक्यते । विमलस्नेहेन सर्वेषाम् अश्रुमोचनमास्वासनं प्रदानञ्च एतेषां प्रमुखकार्यमिति ज्ञायते । अतः पूर्वोक्तचरित्राणामाचरणं दया, स्नेह, तितिक्षा, प्रेम इत्यादीनां भावानां रामायणे-

**"आश्रमस्या विद्धरेमे तापस्यस्तपसस्थिताः ।**

**तास्त्वां वत्से यथा वत्सं पालयिष्यन्ति नित्यशः ।।"**

रघुवंशे कालिदासः वदति-

**"तापसी संसर्गे विनीत सत्वे तपोवने वीतभया वसास्मिन् ।**

**इतो भविष्यत्यनये प्रसूतेरपत्य संस्कारमयो विधिस्ते ।।"**

गङ्गाधरः कथयति-

**"मो आश्रये तोर न थिव कौणसि भावना ।**

**जनमिव येउँ सन्तान तार पाइर् भावना ।।"**

मधुमयरूपायनेन अतिन्द्रिय अमृतपथ दिव्यरसयुक्त संसारस्य अवतारणं गङ्गाधरः करोति । तस्यानुसारणे तदैव मनुष्याणां शाश्वतभोग्यसामग्री यस्याः शोभायुक्तः प्रकाशः अस्मत्समक्षं सर्वोत्तमलोभनीयवस्तुरूपेण प्रतिभाति । अतः अरण्ये निर्वासितां सीतां प्रति वाल्मीकेः आश्वासनं यावत् सीतायाः कुज्झटिकापूर्णस्य मनसः आप्लावनं दिव्यशान्तिरसेन कर्त्तुमपि समर्थः इति अवलोक्यते। सीतायाः सद्यजातविच्छेददुःखस्य आशङ्कायाः च निवारणार्थं वाल्मीकि-प्रदत्ताश्वासनं गङ्गाधरस्य भाषया-

**"श्वशुर तो मोर सुहृत सेहिपरि पिता,**

**असङ्कोचे रह आश्रमे मणि संसार पिता ।**

**मो आश्रमे तोर न थिव कउणसि भावना,**

**जनमिव येउँ सन्तान तार पाइर् भावना ।।"**

पितृकल्पः वाल्मीकिः स्निग्धस्नेहयुक्तम् आश्वासनेन सह जननी कल्पानुकम्पायाः मातृसुलभममत्वं सीतायाः हृदि नवप्राणसञ्चारं कर्तुं यथेष्टम् आसीदिति तत्र अनुमीयते। अतः अनुकम्पायाः स्नेहपूर्णमुक्तितः गङ्गाधरः लिखति-

**"खाआ मा! खाआ मा ! मो घरे तोर कि अछि लाज ।**

**चाहिँ रहिछन्ति तोते तो एहि सखी समाज ।।"**

पतिविरहदुःखजर्जरितायाः निर्वासितायाः मनसि आश्रमं प्रति स्वगृहस्य प्रत्ययं निर्माय आश्वासनं प्रदानार्थम् अनुकम्पा चरित्रस्य अवतारणं गङ्गाधरस्य अनवद्यं कार्यम् । अनुपममातृत्वस्य प्रेममयी विग्रहरूपेण तस्याः आत्मप्रकाशः तथैव तस्याः मातृसुलभाचरणम् उपदेशसमूहश्च मर्मस्पर्शी यत् अस्माकं दैनन्दिनजीवने अतिसुलभमिति ज्ञायते । मातुहृदचिरन्तनीस्नेहस्य आधारः । अतः मनोव्यथायाः निदानं जननी व्यतिरेकम् अन्यः कोऽपि अस्मिन् जगति द्वितीयजनः कर्त्तुं वा क्षमः ? सन्ततिनाम् असीमापराधः तस्याः मनसि कोऽपि प्रभावं न विस्तारयति, अपि च करुणासिक्ता कारयति। अतः गङ्गाधरः कथयति-

**"माता वुझे सुता वेदना,**
**माता नेत्रे दग्धमुखी चन्द्रवदना ।।"**

सन्ततिनां वुभुक्षा निवारणं मातुः परमकर्त्तव्यमिति प्रायशः अनुमीयते। अतः गङ्गाधरस्य काव्ये जननी अनुकम्पायाः चरित्रेऽपि वैशिष्ट्यमिदम् अवलोक्यते । अतः सीतायाः वुभुक्षा शान्तये सा वदति-

**"बारम्बार बोलि मधुरे धीरे भुञ्ज मा भुञ्ज,**
**करे देले भाङ्गि करक मज्जि पुञ्जकु पुञ्ज ।**
**अवशेषे आउ दिउटि आउ दिउटि बोलि,**
**भुञ्जाइले सेहु सतीङ्कि आठ दशटि कोलि ।।"**

समाजे समायोजनस्थापने कन्यकानां मानसिकप्रस्तुतिः मातुः प्रयासेन सम्पादिता भवति । अत्रापि कर्मतत्परायाः सीतायाः अवसन्नता विज्ञाय अनुकम्पां कथयति-

**"मातृस्नेह सुख न थिले वुझि बाल्यजीवने ।**
**सेहि सुख सती वुझिले आजि वाल्मीकि वने ।।"[15]**

पुनश्च आश्रमजीवनविषयकं सुमधुरनीतिपूर्णमुपदेशामृतं सीतां प्रति अनुकम्पायाः स्नेहः, पुनश्च गङ्गाधरस्य रसालतभावपूर्णा दिव्याभिव्यक्तिः अपूर्वम् इति कथनेन नात्युक्तिः। गङ्गाधरकाव्येषु सीता, शकुन्तला, सैरीन्ध्रीः, इन्दुमती, पद्मिनी, रामः, दुष्यन्तः, अजः, पञ्चुपाण्डवादयः यद्यपि मौलिकचरित्राणि न सन्ति, तथापि पुराणेतिहासात् संख्यातीतचरित्रेभ्यः एतेषां निर्वाचनं गङ्गाधरस्य चरित्रचित्रणगतादर्शबोधस्य यथार्थपरिचायकम्। केवलं बाह्य-सौन्दर्यस्य चित्रणं नैतत्, अपि तु तेषां मानसिकक्रिया प्रतिक्रियाजन्यचित्तसंघर्षस्य मनस्तात्विकानुशीलनाधारेण मेहेर-महोदयस्य चरित्राणि अन्तरङ्गमिति अनुमीयते। तस्य प्रत्येकचरित्रं स्वकीयाभिमुखेन आवर्त्तितम्। प्रणयवल्लर्यां दुर्वासा, अयोध्यादृश्ये कैकेयी, निर्दयतायाः स्वार्थपरतायाः च प्रतीकभूतौ कीचकवधे चपलापद्मिनी च पापकर्मानुसारिणी चरित्रत्वेन अवतीर्णे। परन्तु तयोः स्वभावे कर्त्तव्यपरायणता आदर्श अनादर्शानिवार्यवृत्तिक्षेत्रे आज्ञादीनता सर्वदा अवलोक्यते यत् सांसारिकजीवनस्य अपरं प्रमुखवैशिष्ट्यमिति गङ्गाधरस्य काव्याध्ययनेन पाठकाः अवधारणं कर्तुं समर्थाः भवन्ति ।

**तपफले एवे सुन्दरी नव जनम लभि,**
**ध्रुव सम्मुखीन पतिङ्क हेला प्रियवल्लरी ।।"**

अतः प्रकृतिविषये गङ्गाधरमहोदयस्य अवधारणा कीदृशी आसीत् ? राधानाथमहोदयस्य उक्तकथनेन स्पष्टं भवति यत् गङ्गाधरस्य काव्येषु बहिस्थः प्रकृत्योः यथायथचित्रणं चातुर्येण कृतं वर्त्तते। कविप्रसिद्धिं प्राप्तुं ग्रन्थाध्ययनं यावत् आवश्यकं, तावत् ग्रन्थायनमिति राधानाथमहोदयस्य वक्तव्यमासीत् यत् न भावं प्रधानमपि च रसप्रधानमिति अनुमीयते । भारतीयकाव्यशास्त्रपम्परा समृद्धतरान् । न केवलं काव्यशास्त्रस्य विषयवस्तु तत्र काल्पनिकमपि तु जनजीवनस्य सुस्पष्टं प्रतिफलनं तत्र बहुधा अवलोक्यते । तस्यां भारतीयकाव्यपरम्परायां यदि च संस्कृतकाव्यानां प्राबल्यं महत्त्वं च अनुभूयते तथापि क्षेत्रीयसाहित्यानां प्रभावमपि न्यूनं न प्रतिभाति । अस्मिन् प्रसङ्गे उत्कलीयकाव्यानां प्रतिछवि क्षेत्रीयसाहित्यपरिसरे बहुमहत्त्वं विदधाति। तत्र प्रत्येकं युगेषु बहुभिः कविभिः स्वकीयकाव्यरचनायाम् उत्कलीयकाव्यकलेवरे अभिवृद्धिः साधिता । इति दिक्

**पादटिप्पणी**

1. तप. - १ सर्गः
2. उ.रा.च.
3. तप. - १ सर्गः
4. रा.उ. - ६६/१३
5. तप. - ९ सर्गः
6. रा.उ. - ६६/५
7. तप. - ९ सर्गः
8. रा.उ. ४९अध्यायः
9. रघु. १४/७५
10. तप. - २ सर्गः
11. तप. - २ सर्गः
12. रघु. १४/६९
13. तप. - १ सर्गः
14. रघु. - १४/३७
15. तप. - २ सर्गः

**सहायकग्रन्थसूची**

1. कालिदासः, अभिज्ञानशाकुन्तलम्, संपा. सत्यनारायणचक्रवर्त्ति, कोलकाता,संस्कृतपुस्तकभण्डार, 2004
2. Meher, Gangadhar. *Tapaswini: A Poem*. Translated by Madhusūdana Pati, Orissa Sahitya Akademi, Bhubaneswar, 1998
3. मेहर, गंगाधर तपस्वी 1912.(Odia Edition)
4. कालिदासः। रघुवंशम्। मल्लिनाथकृत-सञ्जीविनी-व्याख्यासमलङ्कृतम् तथा 'चन्द्रकला'-हिन्दीव्याख्योपेतम्। व्याख्याकारः डॉ. श्रीकृष्णमणि त्रिपाठी। वाराणसीः चौखम्बा सुरभारती प्रकाशन, 1994, पञ्चम संस्करण
5. Kālidāsa. *Raghuvaṃśam*. Edited by Nārāyaṇa Rāma Ācārya Kāvyatīrtha. Varanasi: Chaukhambha Publishers, 2nd ed., 2002.